E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.313

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
E-ISSN 2584-2870
Devabhūmisaurabham

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# वेदान्तपरिभाषान्तर्गतागमपरिच्छेदस्य समीक्षात्मकमध्ययनम्

# A Critical and Analytical Study of the Chapter on Verbal Testimony (Āgama) in Vedāntaparibhāṣā.

**डॉ० छबिलाल न्यौपाने**
सहायक-प्राचार्यः (दर्शनम्)
नागार्जुन-उमेश-संस्कृतमहाविद्यालयः,
(कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्याङ्गभूतः)
तरौनीग्रामः, दरभङ्गाजनपदः, बिहारप्रदेशः – 847233
सम्पर्कसूत्रम् – 9560754554
ईमेलसङ्केतः – chhabilalneupane@hotmail.com

**१. शोधपत्रसारांशः**

प्रस्तुतशोधपत्रे धर्मराजाध्वरीन्द्रविरचित-वेदान्तपरिभाषायाः 'आगमपरिच्छेदस्य' समीक्षात्मकं विवेचनं विहितम्। अद्वैतवेदान्ते शब्दप्रमाणस्य (आगमस्य) अद्वितीयं महत्त्वं वर्तते, यतः ब्रह्मज्ञानं केवलं श्रुतिप्रमाणगम्यमेव। अस्मिन् प्रबन्धे शाब्दबोधस्य कारणानि (आकाङ्क्षा-योग्यता-आसत्ति-तात्पर्याणि), पद-पदार्थशक्तयः, लक्षणायाः त्रैविध्यं तथा च वेदानाम् अपौरुषेयत्वं दार्शनिकदृष्ट्या विश्लेषितानि। विशेषतः नैयायिक-मीमांसक-मतानां खण्डनपुरस्सरं वेदान्तसिद्धान्तस्य स्थापना कृता। एतद् अध्ययनं शाब्दबोधप्रक्रियायाः अवबोधने साहाय्यं करिष्यति।

**बीजशब्दाः** आगमप्रमाणम्, तात्पर्यज्ञानम्, जहदजहल्लक्षणा, अपौरुषेयत्वम्, वेदान्तपरिभाषा।

**२. शोध-पद्धतिः**

प्रस्तुतशोधपत्रे 'विवरणात्मक-विश्लेषणात्मकी' शोधपद्धतिः अनुसृता। अध्ययनमिदं मुख्यतया मूलग्रन्थेषु (Primary Sources) आधारितं वर्तते। अत्र 'वेदान्तपरिभाषा' इति मूलग्रन्थम् आधारं कृत्वा तस्य विविधटीकानां (यथा शिखामणि-मणिप्रभा-आदीनां) तथा च अन्यदार्शनिकग्रन्थानां तुलनात्मकं विश्लेषणं विहितम्।

**१. भूमिका**

भारतीयदर्शनेषु प्रमाणविचारः अत्यन्तं महत्त्वपूर्णं स्थानं भजते, यतः **'मानधीना मेयसिद्धिः'** इति न्यायेन प्रमाणैः विना प्रमेयाणां (पदार्थानां) यथार्थज्ञानं न सम्भवति। यद्यपि विभिन्नेषु दर्शनेषु प्रत्यक्ष-अनुमान-उपमान-शब्दादीनि प्रमाणानि स्वीकृतानि, तथापि वेदान्तदर्शने शब्दप्रमाणस्य (आगमस्य) स्थानम् अद्वितीयं वर्तते। मुख्यत: अद्वैतवेदान्ते 'ब्रह्म' इत्यस्य अतीन्द्रियवस्तुनः अपरोक्षानुभूतौ शब्दप्रमाणस्यैव प्राधान्यं स्वीक्रियते—**'तन्त्वौपनिषदं पुरुषं पृच्छामि'** इति श्रुतेः।

अद्वैतवेदान्तस्य परिभाषाग्रन्थेषु मूर्धन्यत्वेन विराजते **धर्मराजाध्वरीन्द्र**-विरचिता **'वेदान्तपरिभाषा'**। अयं ग्रन्थः अद्वैतसिद्धान्तस्य प्रमाणमीमांसायाः आधारस्तम्भोऽस्ति। ग्रन्थेऽस्मिन् विषयाणां स्पष्टप्रतिपादनाय षट् परिच्छेदाः विन्यस्ताः सन्ति - प्रत्यक्ष-अनुमान-उपमान-आगम-अर्थापत्ति-अनुपलब्धिभेदेन। तेषु **'आगमपरिच्छेदः'** शब्दप्रमाणस्य तादृशं सूक्ष्मं शास्त्रीयञ्च विवेचनं करोति, येन वाक्यार्थबोधस्य प्रक्रिया सुस्पष्टा भवति।

प्रस्तुतशोधपत्रे आगमपरिच्छेदस्य **समीक्षात्मकं परिशीलनात्मकञ्च** अध्ययनं विधीयते। अत्र विशेषतः आगमप्रमाणस्य लक्षणम्, वाक्यजन्यज्ञानस्य चतुर्विधकारणानि (आकाङ्क्षा, योग्यता, आसत्तिः, तात्पर्यज्ञानञ्च), शब्दवृत्तीनां (शक्ति-लक्षणानां) गम्भीरविवेचनम्, वेदानां प्रामाण्यस्थापनं तथा च पौरुषेय-अपौरुषेयत्वविषयिणी अवधारणा—इत्येतेषां बिन्दूनां दार्शनिकनिकषे परीक्षणं कृत्वा निष्कर्षः प्रस्तोष्यते।

## २. वेदान्तपरिभाषायाम् आगमपरिच्छेदस्य स्थानम्

अद्वैतवेदान्तस्य प्रमाणमीमांसायां शब्दप्रमाणस्य (आगमस्य) प्रामाण्यं स्वतःसिद्धं सर्वोपरि च वर्तते। धर्मराजाध्वरीन्द्रः स्वकीये **'वेदान्तपरिभाषा'** ग्रन्थे प्रमाणानां शास्त्रीयक्रमम् अनुसरन् उपमानप्रमाणस्य निरूपणानन्तरम् आगमप्रमाणस्य लक्षणं विवेचनञ्च करोति। ग्रन्थकारस्य शैली अत्र अतीव संक्षिप्रा स्पष्टा च वर्तते। सः आह— **"अथागमो निरूप्यते"**[1] इति। अत्र 'अथ' शब्दः मङ्गलार्थकः आनन्तर्यार्थकश्च अस्ति, यः उपमाननिरूपणानन्तरं शब्दप्रमाणस्य आरम्भं सूचयति। 'आगम' शब्दस्य व्युत्पत्तिलभ्यार्थो भवति— **"आ सम्यग् गम्यते ज्ञायते अर्थः अनेन इति आगमः"**[2](अत्र 'आ' उपसर्गात् 'गम्' धातोः करणे 'घञ्' प्रत्यये कृते 'आगम' इति रूपं सिद्ध्यति)।

आगमशब्दस्य व्यापकार्थं प्रकटयितुं पौराणिकी संज्ञा अपि उद्धर्तुं शक्यते—

**"आगतं शिववक्त्रेभ्यो गतञ्च गिरिजाश्रुतौ ।**

**मतञ्च वासुदेवेन तदागम इति स्मृतः ॥"**[3]

यद्यपि आगमशब्दस्य प्रयोगः वेदे, तन्त्रशास्त्रे, व्याकरणे (प्रत्यय-आदेश-आगमभेदेन) तथा च विभिन्नशास्त्रेषु बहुधा दृश्यते, तथापि प्रकृतेऽयं शब्दः **'प्रमाणवचनः'** अस्ति। न्यायदर्शने अन्नम्भट्टेन **"आप्तवाक्यं शब्दः"**[4] इति उक्तम्, सांख्यकारिकायाम् अपि **"आप्तवचनं च सर्वप्रमाणसिद्धत्वात्"**[5] इति कथनेन शब्दप्रमाणस्य आप्तवचनत्वं स्वीकृतम्। वेदान्तपरिभाषायां तु अस्य विशेषतः **'वाक्यार्थज्ञान'**रूपेण वैज्ञानिकं विश्लेषणं कृतं वर्तते।

## ३. आगमप्रमाणलक्षणविमर्शः

### ३.१. प्रमाणलक्षणस्य सूक्ष्मविश्लेषणम्

वेदान्तपरिभाषाकारः आगमप्रमाणस्य (शब्दप्रमाणस्य) यत् लक्षणं प्रोवाच, तत् अद्वैतवेदान्तस्य अबाधिततत्वसिद्धान्तस्य अनुरूपमेव वर्तते। ग्रन्थकारस्य मते—

**"यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्।"**[6]

अस्य लक्षणस्य वैदुष्यपूर्णं विश्लेषणं निम्नवत् कर्तुं शक्यते—

- **तात्पर्यविषयीभूतसंसर्गः:** शब्दप्रमाणस्य मुख्यमुद्देश्यं केवलं पदानां ज्ञानं न, अपितु वाक्यार्थबोधोऽस्ति। वाक्यार्थः एव अत्र 'संसर्ग'पदेन उच्यते। स च संसर्गः वक्तुः तात्पर्येण सह सम्बद्धो भवेत्।
- **मानान्तरेण न बाध्यते:** इदं पदं लक्षणस्य अतिव्याप्तिदोषं वारयति। यदि वाक्यजन्यबोधः प्रत्यक्ष-अनुमानादिप्रमाणैः बाधितः स्यात्, तर्हि तत् वाक्यं 'प्रमाणं' न भवितुमर्हति। यथा— **'वह्निना सिञ्चेत्'** । अत्र सेचनक्रियायां वह्नेः करणत्वं प्रत्यक्षेण बाधितमस्ति, अतः इदं वाक्यं न प्रमाणम्।
- **वाक्यस्य इति पदव्यावृत्तिः:** लक्षणे 'वाक्य'ग्रहणं पदमात्रे अतिव्याप्तिवारणाय अस्ति। केवलं पदं (यथा- घटः) संसर्गबोधं न जनयति, अतः वाक्यत्वम् अनिवार्यम्।

---

[1] श्रीधर्मराजाध्वरीन्द्रविरचिता वेदान्तपरिभाषा, सविवरण 'प्रकाश' हिन्दीव्याख्योपेता, व्याख्याकारः श्रीगजाननशास्त्री मुसलगांवकर, चौखम्बा विद्याभवन, वाराणसी, १९६८, पृ. १६९। (आगमपरिच्छेदः, प्रारम्भः) ।

[2] आगमशब्दस्य व्युत्पत्तिः ।

[3] रुद्रयामलतन्त्रम्, शाक्तानन्दतरंगिणी ।

[4] अन्नम्भट्टः, तर्कसंग्रहः, शब्दखण्डः ।

[5] ईश्वरकृष्णः, सांख्यकारिका ४ ।

[6] तत्रैव, पृ. १६९ (आगमपरिच्छेदः, प्रारम्भः) ।

**३.२. विशिष्टस्थलेषु लक्षणसमन्वयः**

अद्वैतवेदान्ते अर्थवादवाक्यानां प्रामाण्यस्थापनं कठिनं कार्यं वर्तते, यस्य समाधानं ग्रन्थकारेण अतीव कौशलेन कृतम्। **'स प्रजापतिरात्मनो वपामुदखिदत्'**[7] इत्यादिवाक्येषु मुख्यार्थः (वपा-उत्खननम्) बाधितः प्रतीयते।

किन्तु अत्र **'तात्पर्य'**पदस्य निवेशः कृतः। अस्य वाक्यस्य तात्पर्यं 'पशुप्राशस्त्ये' (पशु-यागप्रशंसायाम्) अस्ति, न तु वपा-उत्खनने। यतः पशुप्राशस्त्यं मानान्तरेण न बाधितम्, अतः तादृशेषु वाक्येषु न अव्याप्तिः।

**३.३. साजात्यं प्रामाण्यञ्च**

लक्षणे 'मानान्तरेण' इत्यस्य अर्थः **'सजातीयप्रमाणान्तरेण'** इति स्वीकरणीयम्। ग्रन्थकारः अत्र स्पष्टयति—**प्रमाणानां प्रामाण्यं द्विविधम् - व्यावहारिकतत्त्वावेदकत्वं पारमार्थिकतत्त्वावेदकत्वं चेति ।"**[8] अत्र साजात्यञ्च व्यावहारिकतत्त्वावेदकत्वरूपं भवति।"

वेदान्तदर्शने प्रामाण्यं द्विविधं स्वीकृतम्—

1. **व्यावहारिक-प्रामाण्यम्:** घटादिपदार्थानां बोधकानि वाक्यानि व्यवहारदशायां यावत् न बाध्यन्ते, तावत् प्रमाणानि।
2. **पारमार्थिक-प्रामाण्यम्:** 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इत्यादि-महावाक्यानां प्रामाण्यं त्रिकालाबाध्यं वर्तते, यतः एतानि पारमार्थिकसत्तां बोधयन्ति।

**३.२. वाक्यजन्यज्ञानस्य कारणचतुष्टयम्**

शाब्दबोधस्य (वाक्यजन्यज्ञानस्य) प्रक्रियां स्पष्टयन् ग्रन्थकारः चत्वारि अनिवार्यकारणानि निर्दिशति। एतेषां सहकारेणैव वाक्यार्थबोधः सम्भवति—

**"वाक्यजन्यज्ञाने च आकाङ्क्षा-योग्यता-आसत्ति-तात्पर्यज्ञानं चेति चत्वारि कारणानि।"**[9]

अत्र वैशेषिकमतस्य निराकरणं विशेषरूपेण उल्लेखनीयं वर्तते। **वैशेषिकाणां** मतमस्ति यत् शब्दः पृथक् प्रमाणं नास्ति, अपितु अनुमानस्यैव अन्तर्गतः भवति। तेषां तर्कः अस्ति यत् 'गामानय' इत्यादिलौकिकवाक्यानि अथवा 'स्वर्गकामो यजेत' इत्यादिवैदिकवाक्यानि स्वार्थं प्रतिपादयितुं 'योग्यता'-आदिभिः अनुमितानि भवन्ति। अतः शब्दप्रमाणं पृथक् न भूत्वा **'अनुमानप्रमाण'** एव अन्तर्भवति।

अस्य मतस्य खण्डनं कुर्वन् **धर्मराजाध्वरीन्द्रः** प्रतिपादयति यत् शाब्दबोधः अनुमानात्मकः न भवति। सः तर्कयति—अनुमितौ व्याप्तिज्ञानं परामर्शश्च अनिवार्यं कारणं भवति। किन्तु योग्यता-आकाङ्क्षादिभिः सहकारिभिः जन्यमानं वाक्यार्थज्ञानं तादृशं न भवति, यतः तत्र अनुमानप्रक्रियायाः अभावः अस्ति। अतः योग्यतादिसहकारजनितज्ञानस्य अनुमानफलत्वाभावात् तादृशं वाक्यं स्वतन्त्रतया प्रमाणत्वेन अवश्यमभ्युपेयम्।

**४. आकाङ्क्षायाः स्वरूपनिरूपणम्**

**४.१. आकाङ्क्षायाः लक्षणम्**

शाब्दबोधस्य प्रथमं मुख्यं च कारणं 'आकाङ्क्षा' वर्तते। धर्मराजाध्वरीन्द्रः आकाङ्क्षायाः लक्षणं अतीव स्पष्टतया उपस्थापयति—

**"तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वम् आकाङ्क्षा।"**[10]

अस्य लक्षणस्य विवेचनं निम्नबिन्दुभिः स्पष्टीकर्तुं शक्यते—

---

[7] तैत्तिरीयसंहिता २.१.१.४ ।

[8] धर्मराजाध्वरीन्द्रः, वेदान्तपरिभाषा (विषयपरिच्छेदः, प्रारम्भः) ।

[9] तत्रैव, पृ. १६९ (आगमपरिच्छेदः, प्रारम्भः) ।

[10] तत्रैव, पृ. १७१ ।

- **पदार्थानाम् इति उपलक्षणम्:** अत्र ‘पदार्थानाम्’ इति पदं केवलं घट-पटादि-पदार्थानां बोधकं नास्ति, अपितु एतद् वाक्यार्थानामपि उपलक्षणम् अस्ति। एतेन ‘वायुर्वै क्षेपिष्ठा देवता’ इत्यादिषु अर्थवादवाक्येषु अपि प्रधानवाक्यैः सह आकाङ्क्षायाः समन्वयः भवति, तथा च अतिव्याप्ति-अव्याप्तिदोषयोः वारणं भवति।
- **जिज्ञासाविषयत्वस्य उदाहरणम्:** यथा **‘घटमानय’** इति वाक्ये ‘घट’ इति कर्मवाचकपदश्रवणे ‘किं कर्तव्यम्?’ इति आनयन-क्रियायाः जिज्ञासा जायते। तथैव ‘आनय’ इति क्रियाश्रवणे ‘किम् आनयनीयम्?’ इति घट-कर्मणः जिज्ञासा जायते। इयमेव परस्पर-जिज्ञासाविषयता ‘आकाङ्क्षा’ उच्यते।
- **लक्षणस्य द्वौ भागौ:** आकाङ्क्षालक्षणे द्वौ अंशौ मुख्यौ स्तः—
    1. **जिज्ञासाविषयत्वम्:** क्रियाश्रवणे कारकस्य, कारकश्रवणे क्रियायाः, तथा च प्रधानभावनायाः श्रवणे ‘कथम्’ इति इतिकर्तव्यतायाः (अङ्गानां) या जिज्ञासा भवति।
    2. **तद्योग्यत्वम्:** यत्र जिज्ञासा साक्षात् न दृश्यते, तत्रापि जिज्ञासायाः योग्यता वर्तते चेत् आकाङ्क्षा स्वीक्रियते।

### ४.२. वेदान्तिमतस्य वैशिष्ट्यम्

नैयायिकाः आकाङ्क्षां ‘पदनिष्ठा’ इति मन्यन्ते, किन्तु वेदान्तिनः इमाम् **‘अर्थनिष्ठा’** मन्यन्ते। यतः जिज्ञासा अर्थस्य भवति, न तु केवलं शब्दस्य। ग्रन्थकारेण अत्र स्पष्टं कृतं यत् जिज्ञासा स्वयम् आकाङ्क्षा नास्ति (यतः सा ज्ञानरूपा अस्ति), अपितु जिज्ञासायाः ‘योग्यत्वम्’ एव आकाङ्क्षा अस्ति।

### ४.२. न्यायमतम् — पदनिष्ठा अभावरूपा च

नैयायिकानां मते आकाङ्क्षायाः स्वरूपं पदनिष्ठं तथा च अभावात्मकं वर्तते। तेषां लक्षणानुसारम्— “पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयानुभावकत्वम् आकाङ्क्षा।”[11] अस्य तात्पर्यम् अस्ति यत् एकस्य पदस्य (यथा ‘घटम्’) पदान्तरेण (यथा ‘आनय’) विना अन्वयबोधं जनयितुं या अक्षमता (अन्वयबोधप्रागभावः), सैव आकाङ्क्षा। अतः न्यायमते आकाङ्क्षा **‘अभावरूपा’** तथा च शब्दे आश्रिततत्वात् **‘पदनिष्ठा’** मन्यते।

### ४.३. वेदान्तमतम् — अर्थनिष्ठा भावरूपा च

अद्वैतवेदान्ते तु आकाङ्क्षा पदनिष्ठा न भूत्वा **‘अर्थनिष्ठा’** अस्ति। सा अन्वयबोधस्य प्रागभावरूपा नास्ति, अपितु **‘जिज्ञासाविषयत्वयोग्यत्व’**स्वरूपा अस्ति, अतः सा **‘भावरूपा’** वर्तते। ग्रन्थकारः **धर्मराजाध्वरीन्द्रः** न्यायमतस्य खण्डनं कुर्वन् मीमांसासम्मतं **‘वाजिन-आमिक्षा’** न्यायम् उदाहरणत्वेन उपस्थापयति—

**“तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा, वाजिनभ्यो वाजिनम्।”**[12]

**अस्य विवेचनम्:** अस्मिन् स्थले वैश्वदेवयागे ‘आमिक्षा’[13] द्रव्यत्वेन विहिता अस्ति। तत्रैव ‘वाजिनम्’[14] अपि उत्पद्यते। यदि आकाङ्क्षां केवलं ‘पदनिष्ठां’ ‘व्यतिरेकप्रयुक्तां’ च स्वीकुर्मः, तर्हि यथा आमिक्षायाः अन्वयः वैश्वदेवयागेन सह भवति, तथैव वाजिनस्यापि सम्बन्धः तेनैव यागेन सह प्रसज्येत।

किन्तु वस्तुतः वाजिनस्य आकाङ्क्षा ‘वाजिदेवता’भिः सह अस्ति, न तु वैश्वदेवैः। यदि आकाङ्क्षा **‘अर्थनिष्ठा’** (जिज्ञासायोग्यतामूला) न स्यात्, तर्हि यागकर्मणि द्रव्यद्वयस्य संकरः भवेत्, येन विप्रतिपत्तिः (शास्त्रविरोधः) सम्भवेत्। अतः सिद्ध्यति यत् आकाङ्क्षा अर्थनिष्ठा, जिज्ञासाविषयत्वयोग्यत्वरूपा च अस्ति।

---

[11] नैयायिकाभिमतम् आकाङ्क्षास्वरूपम् ।

[12] तत्रैव, पृ. १७४ ।

[13] तप्ते दुग्धे दधि मेलनेन यत् घनद्रव्यं (Curd-clotted milk) जायते, तत् 'आमिक्षा' इति उच्यते। इयं यागस्य मुख्यं द्रव्यं भवति।

[14] आमिक्षायाः निष्कासनानन्तरं यत् अवशिष्टं जलमयं द्रव्यं (Whey) भवति, तत् 'वाजिनम्' इति कथ्यते।

**४.४. बलाबलाधिकरणे आकाङ्क्षाप्रयोगः**

ग्रन्थकारः मीमांसाप्रसिद्धं **'बलाबलाधिकरणम्'**[15] उदाहृत्य आकाङ्क्षायाः अर्थनिष्ठत्वं द्रढयति। सः निर्दिशति यत् शाब्दबोधे आकाङ्क्षायाः निर्णयार्थं प्रमाणेषु बलाबलविचारः आवश्यकः—

**"एतादृशाकाङ्क्षाभिप्रायेणैव बलाबलाधिकरणे 'सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम्' इत्यत्र वैश्वदेवयागस्य आमिक्षान्वितत्वेन न वाजिनाकाङ्क्षा इत्यादिव्यवहारः।"**[16]

**अस्य विवेचनम्:** मीमांसादर्शने **"श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्"**[17] इति न्यायेन पूर्व-पूर्वप्रमाणानि उत्तर-उत्तरप्रमाणपेक्षया प्रबलानि भवन्ति। प्रकृते द्वे वाक्ये स्तः—

१. **'सा वैश्वदेव्यामिक्षा'**: अत्र 'वैश्वदेवी' इति तद्धितप्रत्ययरूप-**श्रुत्या** आमिक्षायाः सम्बन्धः विश्वेदेवैः सह साक्षात् विहितः।

२. **'वाजिभ्यो वाजिनम्'**: अत्र 'वाजिन'द्रव्यस्य सम्बन्धः 'वाजिन्'नामकैः देवताभिः सह अस्ति।

यदि केवलं वाक्यप्रमाणं (Context) पश्येम, तर्हि प्रकरणवशात् वाजिनस्यापि सम्बन्धः वैश्वदेवयागेन सह प्राप्तुं शक्नोति। किन्तु आकाङ्क्षायाः नियमानुसारं—यदा 'वैश्वदेवयागः' आमिक्षारूपद्रव्येण सह अन्वितः (सन्तुष्टः) भवति, तदा तस्य द्रव्यविषयिणी आकाङ्क्षा निवर्तते। अतः आमिक्षा **'श्रुति'** प्रमाणेन प्रबलत्वात् वैश्वदेवयागस्य अङ्गं भवति, वाजिनं च **'वाक्य'**प्रमाणेन दुर्बलत्वात् तत्र न अन्वेति।

**निष्कर्षः:** एतेन सिद्ध्यति यत् आकाङ्क्षा न केवलं पदश्रवणमात्रात् भवति, अपितु अर्थस्य आवश्यकतानुसारं जायते। यदा एकः अर्थः अन्येन अर्थेन पूर्णः भवति, तदा अन्यस्य अर्थस्य आकाङ्क्षा तत्र न तिष्ठति।

**५. योग्यतायाः विवेचनम्**

**५.१. योग्यतालक्षणम्**

शाब्दबोधस्य द्वितीयापेक्षा 'योग्यता' वर्तते। वाक्यस्थ-पदानां परस्परान्वये यः अवरोधः न भवति, सैव योग्यता। ग्रन्थकारः अस्याः पारिभाषिकं लक्षणम् एवमाह—

**"योग्यता च तात्पर्यविषयीभूतसंसर्गाबाधः।"**[18]

अर्थात् वाक्यस्य तात्पर्यं यस्मिन् संसर्गे (सम्बन्धे) अस्ति, तस्य संसर्गस्य प्रमाणान्तरेण (प्रत्यक्षादिना) बाधः न भवेत्। अस्य लक्षणस्य स्पष्टीकरणाय अधोलिखितानि उदाहरणानि अवलोकनीयानि—

- **'वत्सं बधान':** अस्मिन् वाक्ये 'वत्स' (कर्म) तथा 'बन्धन' (क्रिया) इत्यनयोः परस्परं 'कर्मत्व-क्रियात्व'रूपः संसर्गः अस्ति। अयं संसर्गः लोके प्रत्यक्षादिप्रमाणैः न बाध्यते, यतः वत्से बन्धनक्रिया सम्भवा अस्ति। अतः अत्र योग्यता वर्तते।
- **'पयसा सिञ्चति':** अत्र सेचनक्रियायां 'पयः' (दुग्धं/जलम्) करणत्वेन अन्वेति। सेचनं द्रवद्रव्येणैव सम्भवति इति प्रत्यक्षसिद्धम्, अतः अत्र संसर्गस्य बाधाभावात् 'योग्यता' अस्ति।

**५.२. अयोग्यता (बाधः)**

---

[15] महर्षिजैमिनिः, जैमिनीयसूत्रम् ३.३.१४।
[16] तत्रैव, पृ. १७४ (आगमपरिच्छेदः, आकाङ्क्षानिरूपणम्)।
[17] महर्षिजैमिनिः, मीमांसासूत्रम् ३.३.१८।
[18] तत्रैव, पृ. १८१ (आगमपरिच्छेदः, योग्यतानिरूपणम्)।

यत्र संसर्गस्य बाधः भवति, तत्र 'अयोग्यता' मन्यते। यथा— **'वह्निना सिञ्चति'**। अत्र सेचनक्रियायां वह्नेः (अग्नेः) करणत्वं तात्पर्यविषयः अस्ति, किन्तु अग्निः दाहकोऽस्ति न तु क्लेदकः। अतः प्रत्यक्षेण वह्निकरणक-सेचनस्य बाधो जायते। ईदृशेषु स्थलेषु योग्यतायाः अभावात् शाब्दबोधो न जायते।

**५.२. अयोग्यतायाः (बाधस्य) उदाहरणम्**

यत्र वाक्यप्रतिपाद्यः अर्थः प्रमाणान्तरेण विरुध्यते, तत्र 'योग्यता' न भवति। ग्रन्थकारः अस्य स्पष्टोदाहरणं ददाति—

**"वह्निना सिञ्चती इत्यादौ तादृशसंसर्गबाधान्न योग्यता।"**[19]

**विवेचनम्:** अत्र 'वह्निः' (अग्निः) सेकक्रियायाः करणत्वेन उपन्यस्तः, किन्तु वह्नेः स्वभावः दाहकः अस्ति, न तु क्लेदकः। अतः प्रत्यक्षेण वह्निकरणक-सेचनस्य बाधात् तादृशवाक्येभ्यः यथार्थः शाब्दबोधः न जायते। एवमेव **'जलेन दहेत्'** इत्यादावपि जलस्य दाहकत्वं प्रत्यक्षेण बाधितम् अस्ति, अतः अत्रापि योग्यतायाः अभावात् अप्रमाणत्वं सिद्धम्।

**५.३. आक्षेपसमाधानम् — 'स प्रजापतिरात्मनो वपामुदखिदत्'**

वेदान्तपरिभाषाकारः अत्र एकं गम्भीरं प्रश्नं विचारयति। श्रुतौ वाक्यमस्ति—

**"स प्रजापतिरात्मनो वपामुदखिदत्"**[20]

**आक्षेपः:** अत्र स्वकीय-वपा-निकासनरूपः यः संसर्गः (अर्थः) प्रतीयते, सः प्रत्यक्षबाधितोऽस्ति। कश्चिदपि प्राणी स्ववपां निष्कास्य जीवितुं न शक्नोति। अतोऽस्मिन् वाक्ये योग्यता नास्ति इति कथं न स्वीक्रियते?

**समाधानम्:** ग्रन्थकारः अत्र **'तात्पर्य'** इति पदस्य महत्त्वं दर्शयति। सः कथयति—

**"स प्रजापतिरात्मनो वपामुदखिदत्" इत्यादावपि तात्पर्यविषयीभूतपशुप्राशस्त्याबाधात् योग्यता।"**[21]

**निष्कर्षः:** अस्य वाक्यस्य पशुप्राशस्त्ये तात्पर्यम्। पशुयागस्य प्रशंसायां तात्पर्यसत्त्वे तस्य च बाधाभावात् योग्यता। अर्थवादवाक्यानां मुख्यं तात्पर्यं स्वार्थे न भवति, अपितु विधेयस्य—यथा पशुयागस्य—प्रशंसायामेव भवति। पशुयागस्य प्रशंसा तु प्रत्यक्षबाधिता नास्ति। अतः तात्पर्यविषयीभूतस्य अर्थस्य अबाधितत्वात् तादृशेषु स्थलेष्वपि 'योग्यता' अक्षुण्णैव तिष्ठति।

**५.४. 'तत्त्वमसि' महावाक्ये योग्यताविमर्शः**

अद्वैतवेदान्तस्य परमं लक्ष्यं जीवब्रह्मणोः अभेदसिद्धिः अस्ति। अत्र 'तत्त्वमसि' इत्यादि-महावाक्येषु योग्यताविषयकः एकः सूक्ष्मः आक्षेपः समुदेति—

**आक्षेपः:** 'तत्त्वमसि' इति वाक्ये 'तत्' पदस्य वाच्यः अर्थः 'परोक्षत्व-सर्वज्ञत्वादि-विशिष्ट-चैतन्यम्' अस्ति, तथा च 'त्वम्' पदस्य वाच्यः अर्थः 'अपरोक्षत्व-अल्पज्ञत्वादि-विशिष्ट-चैतन्यम्' अस्ति। परोक्षत्व-अपरोक्षत्वयोः (एकत्र परोक्षता, अन्यत्र अपरोक्षता) स्वभावतः विरोधो वर्तते। अतः विरुद्धधर्मयोः आश्रयभूतयोः पदार्थयोः 'अभेदान्वयरूपः' संसर्गः बाधितः प्रतीयते। यत्र संसर्गः बाधितः, तत्र योग्यतायाः अभावात् कथं प्रामाण्यम्?

**समाधानम्:** अत्र ग्रन्थकारः समाधानं ददाति यत् योग्यतायाः विचारः **'लक्ष्यार्थ'**दृष्ट्या करणीयः, न तु वाच्यार्थदृष्ट्या। सः कथयति—

**"वाच्याभेदेऽपि लक्ष्यस्वरूपाभेदबाधाभावाद् योग्यता।"**[22]

---

[19] तत्रैव, पृ. १८१।

[20] तैत्तिरीयसंहिता २.१.१.४।

[21] तत्रैव, पृ. १८१।

[22] तत्रैव, पृ. १८१।

अर्थात्, यद्यपि विशिष्टयोः (विशेषणसहितयोः) अर्थयोः अभेदो बाधितः, तथापि 'भागत्यागलक्षणया'[23] विरुद्ध-अंशानां (परोक्षत्व-अपरोक्षत्वादीनां) परित्यागे सति, यः **'शुद्धचैतन्य'**रूपः विशेष्यांशोऽवशिष्यते, तस्मिन् अभेदान्वयस्य कोऽपि बाधो नास्ति। अतः लक्ष्यार्थे बाधाभावाद् योग्यता सिद्ध्यति। अत्र दृष्टान्तपुरस्सरं वक्तुं शक्यते यत्— "यथा लोके 'रज्जुसर्प'स्थले सर्पत्वस्य बाधेऽपि रज्जुद्रव्यस्य अबाधः, तथैव जीवत्व-ईश्वरत्वयोः बाधेऽपि चैतन्यस्य अबाधात् योग्यता सिद्ध्यति।" अत्र **'बाधायां सामानाधिकरण्यम्'**[24] इति न्यायेन जीवत्व-ईश्वरत्वयोः विरोधांशत्यागे सति शुद्धचैतन्ये 'ऐक्यपरत्वम्' सिद्ध्यति। एवं च विशेषणयोः विरोधेऽपि विशेष्यांशस्य चैतन्यस्य कालत्रयाबाध्यत्वात् अत्र योग्यतायाः सुतरां सिद्धिः भवति।

**भामतीप्रस्थानस्य उल्लेखः:** अस्मिन् सन्दर्भे धर्मराजाध्वरीन्द्रः **'भामती'** ग्रन्थस्य (वाचस्पतिमिश्रकृत) अभिप्रायम् उद्धरति—

> **"वयन्तु ब्रूमः—सोऽयं देवदत्तः, तत्त्वमसीत्यादौ विशिष्टवाचकपदानामेकदेशपरत्वेऽपि न लक्षणा, शक्त्युपस्थितयोर्विशिष्टयोरभेदान्वयानुपपत्तौ विशेष्ययोः शक्त्युपस्थितयोरेवाभेदान्वयाविरोधात्।"**[25]

अत्र भामतीकारस्य आशयोऽस्ति यत् यथा 'सोऽयं देवदत्तः' इति वाक्ये तद्देश-कालविशिष्टस्य तथा एतद्देश-कालविशिष्टस्य देवदत्तस्य एकत्वं विशेष्यांशे (व्यक्तिमात्रे) न विरुध्यते, तथैव 'तत्त्वमसि' इत्यत्रापि अखण्डचैतन्ये अभेदः सुसंगतः अस्ति।

**६. आसत्तेः स्वरूपनिरूपणम्**

**६.१. आसत्तिलक्षणम्**

शाब्दबोधाय तृतीयम् अनिवार्यं कारणम् 'आसत्तिः' (सन्निधिः) वर्तते। ग्रन्थकारः अस्याः लक्षणं निर्दिशति—

**"आसत्तिश्च अव्यवधानेन पदजन्यपदार्थोपस्थितिः।"**[26]

अत्र **'पदजन्य'** इति विशेषणेन इदं स्पष्टं भवति यत् शाब्दबोधे पदार्थानाम् उपस्थितिः केनापि शब्देनैव भवेत्। यदि पदार्थानां ज्ञानं प्रत्यक्षादिना 'मानान्तरेण' भवति, तर्हि तत्र शाब्दबोधो न जायते।

**६.२. 'अव्यवधान'पदस्य सार्थकता**

---

[23] यत्र हि विशिष्टवाचकः शब्दः एकदेशं विहाय, एकदेशे वर्तते, तत्र जहदजहल्लक्षणा (भागत्यागलक्षणा)।, विरुद्धांशस्य परित्यागः, अविरुद्धांशस्य ग्रहणम्, अथवा विशेषणांशस्य परित्यागः, विशेष्यांशस्य परिग्रहः।

[24] **पाठविवरणम् -** यदा कस्यचित् वाक्यस्य वा ज्ञानस्य बाधा भवति, तदा सा बाधा तस्यैव विषयस्य भवति यस्मिन् विषये पूर्वं ज्ञानम् उत्पन्नम्। अर्थात् बाधकज्ञानं बाध्यज्ञानस्य विषयभूतेन अर्थेन सह समानाधिकरण्येन एव प्रवर्तते। अन्यविषये स्थितेन ज्ञानेन पूर्वज्ञानस्य बाधा न सम्भवति। अतः "बाधायां सामानाधिकरण्यम्" इति न्यायस्य अभिप्रायः अयं यत्—यत् ज्ञानं बाध्यते, तस्य विषय एव बाधकज्ञानस्यापि विषयः भवति; उभयोः विषययोः एकाधिकरणत्वम् अपेक्षितम्। तस्मात् बाधा तदा एव सिद्ध्यति यदा बाधकबाध्ययोः ज्ञानयोः विषयः एक एव भवति। उदाहरणतया— "इदं रजतम्" इति भ्रान्तिज्ञानं यदा "इदं शुक्तिः" इति यथार्थज्ञानोत्पत्त्या निवर्तते, तदा उभयोरपि ज्ञानयोः विषयः इदम् इति एक एव आश्रयः भवति। अतः अत्र समानाधिकरण्येन बाधा सिद्ध्यति। "बाधायां सामानाधिकरण्यम्" न्यायस्य "तत्त्वमसि" वाक्ये प्रयोगः "बाधायां सामानाधिकरण्यम्" इति न्यायस्य भावः "तत्त्वमसि" इत्यस्य महावाक्ये स्पष्टतया दृश्यते। अत्र "तत्" तथा "त्वम्" इति पदयोः मुख्यार्थयोः प्रत्यक्षतया विरोधः दृश्यते। "तत्" इति पदेन सर्वज्ञत्वादिगुणयुक्तं ब्रह्म बोध्यते, "त्वम्" इति पदेन तु देहाद्युपाधिसंयुक्तः सीमितजीवः बोध्यते। एतयोः मुख्यार्थयोः भेदः सति, तयोः अभेदप्रतिपादनं प्रत्यक्षतया असम्भवमिव दृश्यते। अतः अत्र मुख्यार्थयोः बाधा स्वीक्रियते। किन्तु एषा बाधा तयोः समानाधिकरणे एव भवति, अर्थात् उभयोरपि पदयोः विषयः अन्ततः चैतन्यमेव इति एकः एव आधारः अस्ति। "तत्" पदे ब्रह्मणः मायोपाधिः, "त्वम्" पदे च जीवस्य देहाद्युपाधिः बाध्यते। उपाधीनां बाधायां सति उभयोः पदयोः अवशिष्टः अर्थः शुद्धं चैतन्यमेव भवति। तस्मात् "तत्त्वमसि" इति वाक्ये बाधायां सामानाधिकरण्यम् इति न्यायः अयं दर्शयति यत्—यद्यपि "तत्" तथा "त्वम्" इत्येतयोः पदयोः उपाधिसम्बन्धे भेदः दृश्यते, तथापि उभयोरपि आधारभूतं चैतन्यं एकमेव अस्ति। तस्मिन् एव समानाधिकरणे उपाधिभेदस्य बाधा कृत्वा अभेदार्थः प्रतिपाद्यते।
निष्कर्षः - अतः "बाधायां सामानाधिकरण्यम्" न्यायः दर्शयति यत् सत्यबोधाय विरुद्धधर्माणां बाधा अनिवार्या, किन्तु सा बाधा तदा एव सफला भवति यदा बाधकज्ञानं बाध्यज्ञानेन सह एकस्मिन् एव अधिकरणे (आधारे) वर्तते। 'तत्त्वमसि' इत्यत्र चैतन्यरूपे अधिकरणे एव जीवत्व-ईश्वरत्वयोः बाधा भूत्वा 'ब्रह्मात्मैक्यम्' प्रतिष्ठितं भवति।

[25] तत्रैव, पृ. २०९।

[26] तत्रैव, पृ. १८३।

वाक्ये प्रयुक्तानां पदानाम् अर्थबोधे कालकृतः अथवा पदकृतः अन्तरालः न भवेत्।

- **कालकृत-व्यवधानम्:** यदि कश्चित् 'गाम्' इति प्रातः वदेत्, 'आनय' इति च सायं, तर्हि तयोः पदयोः मध्ये कालकृत-व्यवधानात् आसत्तिः न भवति, शाब्दबोधश्च न जायते।
- **पदकृत-व्यवधानम्: 'चन्द्रं भुङ्क्ष्व ओदनं पश्य'** इत्यत्र 'चन्द्रम्' इति पदस्य 'पश्य' इति क्रियया सह अन्वयः भवितुमर्हति, किन्तु मध्ये 'भुङ्क्ष्व' तथा 'ओदनम्' इति पदद्वयस्य व्यवधानात् अन्वयबोधः न भवति।
- **क्रमदोषः: 'गिरिर्भक्तमग्निमान् देवदत्तेन'** इत्यत्रापि पदानां व्यस्ततया उच्चारणात् आसत्तेः अभावे वाक्यार्थबोधः क्लिष्टः जायते।

**६.३. 'पदजन्य' पदस्य प्रयोजनम्**

शाब्दबोधे साक्षात् पदस्यैव व्यापारः भवति। यथा— **'घटं पश्य'** इति वाक्ये यदि घटः प्रत्यक्षतः दृश्यते, तथापि शब्दश्रवणं विना तस्य वाक्यार्थे अन्वयः न स्वीक्रियते। यतः 'मानान्तरोपस्थापितत्वेन' (शब्देतरप्रमाणैः ज्ञातत्वेन) तत्र पदजन्यत्वाभावः वर्तते। एतेनेदं सिद्धं भवति यत् शाब्दबोधः शब्दजन्य-संस्काराणाम् एव फलम् अस्ति।

विषयेऽस्मिन् नागेशभट्टोऽपि स्पष्टतया प्रतिपादयति— **"तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः। अत एव नागृहीतवृत्तिकस्य शाब्दबोधः।"**[27]

**६.४. पदाध्याहारनिरूपणम् (अश्रुतपदार्थस्थलम्)**

यत्र वाक्ये कस्यचित् पदस्य श्रवणं न भवति, किन्तु अर्थबोधाय तस्य आवश्यकता वर्तते, तत्र 'पदस्य' अध्याहारः क्रियते, न तु केवलं 'अर्थस्य'। ग्रन्थकारः आह—

**"अत एवाश्रुतपदार्थस्थले तत्तत्पदाध्याहारः— 'द्वारम्' इत्यादौ 'पिधेहि' इति।"**[28]

**विवेचनम्:**

1. **लौकिक-उदाहरणम्:** 'द्वारम्' इत्युक्ते 'पिधेहि' इति क्रियापदस्य अध्याहारोऽनिवार्यः, अन्यथा आकाङ्क्षा न शाम्यति।
2. **वैदिक-उदाहरणम्: 'इषे त्वा'** इत्यादिमन्त्रेषु **'छिनद्मि'** इति क्रियापदस्य अध्याहारः क्रियते।
3. **मीमांसा-उदाहरणम्:** विकृति-यागेषु **'सूर्याय जुष्टं निर्वपामि'** इति ऊहः (पदाध्याहारः/परिवर्तनं) क्रियते। अत्र यदि केवलं अर्थाध्याहारः अभविष्यत्, तर्हि मन्त्रपाठस्य शास्त्रीयता न अरक्षिष्यत। अतः 'पदजन्या उपस्थितिः' एव आसत्तिः इति सिद्धान्तः।

**७. तात्पर्यज्ञानस्य मीमांसा**

**७.१. तात्पर्यलक्षणविमर्शः**

शाब्दबोधस्य चतुर्थं कारणं 'तात्पर्यम्' अस्ति। ग्रन्थकारः नैयायिकानां **'तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यम्'** इति लक्षणं निराकरोति।[29] नैयायिकमते यदि वक्ता अर्थबोधस्य इच्छया शब्दम् उच्चारयति, तदैव तत् तात्पर्यं भवति।

---

[27] परमलघुमञ्जूषा, शक्तिविचारः।

[28] तत्रैव, पृ. १८३।

[29] क्रमप्राप्तं तात्पर्यं निरूप्यते। तत्र तत्प्रतीतीच्छयोच्चरितत्वं न तात्पर्यम् , अर्थज्ञानशून्येन पुरुषेणोच्चरिताद्वेदादर्थप्रत्ययाभावप्रसङ्गात्। तत्रैव, पृ. २२४। (आगमपरिच्छेदः, तात्पर्यनिरूपणम्)।

**खण्डनम्:** यदि वक्तुरिच्छा एव तात्पर्यं स्यात्, तर्हि कश्चन अर्थज्ञानशून्यः पुरुषः (यथा कश्चन बालकः वा शुकः) यदि वेदवाक्यम् उच्चारयेत्, तर्हि श्रोतुः अर्थबोधः न स्यात्, यतः वक्ता तस्य अर्थं न जानाति, अतः तस्य इच्छा अपि न सम्भवति। किन्तु लोके तादृशस्थलेष्वपि अर्थबोधः दृश्यते, अतः नैयायिकलक्षणम् अयुक्तम्।

**७.२. ईश्वरीयतात्पर्यज्ञानस्य निरासः**

यदि केचन वदन्ति यत् वेदस्थले ईश्वरस्य इच्छा (तात्पर्यम्) गृह्यते, तर्हि तदपि न युज्यते। यतः यः पुरुषः ईश्वरं न मन्यते (नास्तिकः/मीमांसकः), तस्यापि वेदवाक्यश्रवणेन अर्थबोधो जायते। अतः शाब्दबोधे ईश्वरीयतात्पर्यज्ञानं न अनिवार्यम्।

**७.३. विवरणाचार्याशयस्य स्पष्टीकरणम्**

**विवरणप्रस्थाने** (चतुर्थवर्णके) तात्पर्यज्ञानस्य कारणत्वं निषिद्धम् इव प्रतिभाति। तत्र समाधानं ददन् धर्मराजाध्वरीन्द्रः कथयति यत् विवरणाचार्याः 'तात्पर्यज्ञानम्' एव न मन्यन्ते इति न, अपितु ते नैयायिकोक्तं 'इच्छारूपं' तात्पर्यं निराकुर्वन्ति। वेदान्तमते तु **'तत्प्रतीतिजननयोग्यता'** (शब्दार्थबोधनशक्तिः) एव तात्पर्यम् अस्ति, सा च विवरणाचार्यैरपि स्वीकृता।

**७.४. तात्पर्यज्ञानस्य उपयोगिता**

रत्नप्रभाकारादयः आचार्याः मन्यन्ते यत् यत्र अर्थद्वयस्य सम्भावना भवति, तत्र तात्पर्यनिश्चयः अनिवार्यः। यथा— **'सैन्धवमानय' ।**

अत्र 'सैन्धव' शब्दस्य अर्थद्वयम् अस्ति— **लवणम्** तथा **अश्वः** । यदि भोजनसमये कश्चन वदति 'सैन्धवमानय', तर्हि 'प्रकरणात्' लवणस्यैव बोधः भवति। अत्र तात्पर्यज्ञानेन विना वाक्यार्थनिश्चयः न सम्भवति। अतः संशयस्थले तात्पर्यज्ञानं शाब्दबोधे हेतुः वर्तते।

**७.५. तात्पर्यनिश्चयस्य साधनानि**

तात्पर्यनिश्चयः कथं भवति? इति प्रश्ने ग्रन्थकारः द्विविधं मार्गं दर्शयति—

**१. लोके:** लौकिकवाक्येषु प्रकरण-देश-काल-संयोगादिभिः तात्पर्यं ज्ञायते। अत्र अभियुक्तोक्तिद्वयं स्मर्तव्यम्—

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**

**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः॥**

**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।**

**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥**[30]

तथा च—

**अर्थात् प्रकरणाल्लिङ्गादौचित्यादेशकालतः।**

**शब्दार्थाः पृथगभ्यन्ते न रूपादेव केवलात् ॥**

**२. वेदे:** वेदे तु तात्पर्यस्य निश्चयार्थं मीमांसाशास्त्रोक्तानि षड्विधलिङ्गानि एव परमसाधनानि वर्तन्ते, यैः विना गम्भीरवाक्यार्थनिश्चयः न सम्भवति। अद्वैतसिद्धान्ते एतेषां लिङ्गानां साहाय्येनैव वेदवाक्यानां 'ब्रह्मपरत्वं' सिद्ध्यति। उक्तं च—

**उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।**

**अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥**[31]

---

[30] भर्तृहरिः, वाक्यपदीयम् २.३१४-३१५ ।

[31] पूर्वमीमांसाशास्त्रोक्तषड्विधतात्पर्यलिङ्गानि ।

एतैः उपक्रम-उपसंहारादिभिः षड्भिः प्रमाणैः एव 'तत्त्वमसि' इत्यादि-महावाक्यानां मुख्यं तात्पर्यं 'शुद्धचैतन्ये' अस्ति इति निर्णीयते। एतेन सिद्ध्यति यत् तात्पर्यज्ञानं न केवलं शब्दश्रवणमात्रेण, अपितु शास्त्रीयविमर्शद्वारा जायते।

**८. शक्तिविचारः**

**८.१. शक्तेः स्वरूपम्**

शब्दार्थयोः सम्बन्धं निरूपयन् ग्रन्थकारः वृत्तिद्वयं (शक्तिं लक्षणाम् च) स्वीकरोति। तत्र प्राथमिक्याः शक्तेः लक्षणं यथा—

**"पदार्थश्च द्विविधः शक्यो लक्ष्यश्चेति । तत्र (शक्यलक्ष्ययोर्मध्ये) शक्तिर्नाम पदानामर्थेषु मुख्या वृत्तिः। यथा घटपदस्य पृथुबुध्नोदराद्याकृतिविशिष्टे वस्तुविशेषे वृत्तिः। सा च शक्तिः पदार्थान्तरम्।"**[32]

**विवेचनम्:** अद्वैतवेदान्ते शक्तिः न केवलं वक्तुरिच्छा (नैयायिकानां मते इव), अपितु सा एकः **'पदार्थान्तरम्'** (स्वतन्त्रः पदार्थः) वर्तते। यदि शक्तिं केवलम् 'इच्छारूपां' मन्महे, तर्हि भ्रमात् कश्चन पुरुषः 'घट'पदेन 'पटस्य'इच्छां कुर्यात्, तर्हि घटशब्दात् पटावगतिः भवेत्, येन महान् **'अव्यवस्था-दोषः'** प्रसज्येत। अतः शक्तिः पदेषु स्थिता स्वाभाविकधर्मरूपा वर्तते।

**८.२. शक्त्यनुमानम्**

शक्तिः अतीन्द्रिया वर्तते, अतः सा प्रत्यक्षविषया न भवति। तस्याः ज्ञानम् अनुमानेन एवं विधीयते—

**"सा च तत्तत्पदजन्यपदार्थज्ञानरूपकार्यादनुमेया।"**[33]

**अनुमानप्रयोगः:** 'इदं पदं स्वार्थविषयकशक्तिमत्, तज्जन्य-पदार्थज्ञान-जनकत्वात्, यत् यज्जनकं तत् तत्शक्तिमद् भवति, यथा दाहात् अग्नौ दाहिका शक्तिः अनुमीयते।'

**८.३. शक्यत्वविचारः (जातिशक्तिवादः)**

शक्तेः आश्रयः कः? इति जिज्ञासायां ग्रन्थकारः सिद्धान्तयति—

**"तादृशशक्तिविषयत्वं शक्यत्वम्। तच्च जातेरेव, न व्यक्तेः। व्यक्तीनामानन्त्येन गुरुत्वात् ।"**[34]

**समाधानम्:** यदि शक्तेः सम्बन्धं व्यक्तिभिः (Individual entities) सह स्वीकुर्मः, तर्हि संसारस्य अनन्त-व्यक्तीनां ज्ञानं कदापि न सम्भवति, येन 'गौरव-दोषः' जायते। अतः शक्तिः **'जातौ'** (यथा गोत्वे) एव वर्तते।

**आक्षेपः:** यदि शक्तिः जातौ अस्ति, तर्हि 'गामानय' इति वाक्येन 'व्यक्तिः' कथं प्रतीयते? जातिः तु अमूर्ता भवति।

**उत्तरम्:** ग्रन्थकारः **'समानसंवित्संवेद्यत्व'**न्यायं स्वीकरोति। अर्थात् यदा वयं जातिं जानीमः, तदा सा जातिः व्यक्त्या विना न तिष्ठति। अतः एकस्मिन्नेव ज्ञाने जातिः व्यक्तिश्च द्वौ अपि भासते।

**८.४. भट्ट-प्रभाकरमतयोः समन्वयः**

ग्रन्थकारः अत्र **'मीमांसा-सिद्धान्तम्'** अनुसरति। तदनुसारं जातौ शक्तिः अस्ति, किन्तु व्यक्तेः ज्ञानं **'लक्षणया'** अथवा **'आक्षेपेण'** भवति। यथा—**'शुक्लो घटः'**। अत्र 'शुक्ल' शब्दस्य शक्तिः 'शुक्ल-गुणे' अस्ति, किन्तु सः गुणः द्रव्येण (घटेन) सह सम्बद्धः (अविनाभावः) अस्ति, अतः लक्षणया द्रव्यस्य

---

[32] तत्रैव, पृ. १८७।

[33] तत्रैव, पृ. १८९।

[34] तत्रैव, पृ. १८९।

(गुणविशिष्टस्य) अपि बोधः भवति। एवं गवादिपदेषु अपि गोत्वजातेः शक्त्या, गोव्यक्तेश्च लक्षणया प्रतीतिः भवति इति निष्कर्षः। तदुक्तम् – **अनन्यलभ्यो हि शब्दार्थः।**[35]

**८.४.१ 'अनन्यलभ्यो हि शब्दार्थः' इति न्यायस्य सारः—**

शब्दस्य मुख्या शक्तिः तस्मिन्नेव अर्थे कल्पनीया, यः अन्यतः (प्रत्यक्षादिना सम्बन्धबलेन वा) प्राप्तुं न शक्यते। यथा 'शुक्ल' इति पदे मुख्या शक्तिः केवलं 'शुक्ल-गुणे' एव वर्तते, न तु द्रव्ये। यतः गुणः द्रव्यं विना न तिष्ठति इति नियमात् (अविनाभावात्) द्रव्यस्य बोधः तु स्वतः एव जायते, अतः तत्र शब्दस्य पृथक् शक्ति-कल्पना 'गौरव-दोषाय' भवति।

एवमेव 'गवादि' पदेषु अपि 'गोत्व-जातौ' एव शक्तिः स्वीक्रियते, न तु व्यक्तौ। जातिबोधे सति व्यक्तिबोधः लक्षणया अथवा आक्षेपेण अन्यतः (सम्बन्धबलेन) सिद्धः भवति। अतः यः अंशः 'अन्यलभ्यः' अस्ति, सः शब्दस्य मुख्य-विषयः न भवति। इत्थं च, **यः अर्थः अन्यप्रमाणैः अलभ्यः, स एव वास्तविकः 'शब्दार्थः' इति दार्शनिकः निष्कर्षः।**

[35] तत्रैव, पृ. १९७।

**९. लक्षणाप्रकरणम्**

**९.१. लक्षणायाः स्वरूपम्**

यत्र शब्दस्य मुख्यार्थः (शक्यार्थः) तात्पर्येण सह न सङ्गच्छते, तत्र शब्दस्य या द्वितीया वृत्तिः कार्यं करोति, सा ‘लक्षणा’ उच्यते। ग्रन्थकारः अस्याः प्राथमिकं द्वैविध्यं दर्शयति—

**“लक्षणाविषयो लक्ष्यः। लक्षणा च द्विविधा—केवललक्षणा, लक्षितलक्षणा चेति।”**[36]

**९.२. केवललक्षणा:** यत्र शक्यार्थेन सह साक्षात् सम्बन्धः भवति। यथा— **‘गङ्गायां घोषः’**। अत्र ‘गङ्गा’ पदस्य वाच्यः अर्थः ‘प्रवाहः’ अस्ति, तेन सह साक्षात् सम्बद्धं ‘तीरम्’ अस्ति। अतः अत्र केवललक्षणा।[37]

**९.३. लक्षितलक्षणा (गौणी):** यत्र शक्यार्थेन सह परम्परासम्बन्धः भवति। यथा— **‘द्विरेफ’** पदस्य शक्त्या अर्थः ‘रेफद्वयम्’ अस्ति। तस्य भ्रमरशब्देन सह सम्बन्धः, ततः भ्रमरशब्देन ‘मधुकरस्य प्रतीतिर्भवति।[38] वेदान्तमते **‘गौणी वृत्तिः’** (यथा ‘सिंहो माणवकः’) अपि लक्षितलक्षणायाम् एव अन्तर्भवति, यतः अत्र सिंहनिष्ठाः ‘शौर्यादयः’ गुणाः परम्परासम्बन्धेन माणवके गृह्यन्ते।

**९.४. प्रकारान्तरेण लक्षणा-त्रैविध्यम्**

विशेषतः वाक्यार्थबोधस्य प्रक्रियायां लक्षणा त्रिधा विभक्ता अस्ति—

१. **जहल्लक्षणा:** यत्र शब्दः स्वकीयं पूर्णं वाच्यार्थं त्यक्त्वा अन्यमर्थं बोधयति। यथा— **‘विषं भुङ्क्ष्व’**। अत्र विषभक्षणं तात्पर्यं नास्ति, अपितु ‘शत्रुगृहे भोजननिवृत्तिः’ तात्पर्यम् अस्ति।[39]

२. **अजहल्लक्षणा:** यत्र शब्दः स्वार्थं परित्यज्य विना एव अन्यमर्थं बोधयति। यथा— **‘शुक्लो घटः’**। अत्र ‘शुक्ल’ शब्दः शुक्लगुणं न त्यजति, अपितु तद्विशिष्टं ‘द्रव्यम्’ अपि बोधयति।[40]

३. **जहदजहल्लक्षणा (भागत्यागलक्षणा):** यत्र विशिष्टवाचकः शब्दः स्वार्थस्य एकदेशं (विशेषणांशं) त्यजति, एकदेशं (विशेष्यांशं) च गृह्णाति, तत्र जहदजहल्लक्षणा।[41] यथा— **‘सोऽयं देवदत्तः’** इति वाक्ये ‘सः’ तथा ‘अयम्’ इत्येतयोः पदयोः कालदेशाद्युपाधिरूपं विशेषणांशं परित्यज्य देवदत्तव्यक्तिरूपः विशेष्यांशः एव ग्राह्यो भवति, तेन तयोः अभेदबोधः सिद्ध्यति।

तथा च जहदजहल्लक्षणाया अन्यदपि प्रसिद्धमुदाहरणम्— **“काकेभ्यो दधि रक्ष्यताम्”** इति। अत्र ‘काक’शब्दस्य शक्यकाकत्वं परित्यज्य अशक्यदध्युपघातकत्वपुरस्कारेण अकाकेऽपि काकशब्दस्य प्रवृत्तिः दृश्यते। अर्थात् केवलं काकविशेष एव न, अपितु ये केचन दध्नः उपघातकर्तारः भवन्ति ते सर्वे अपि तत्र ‘काक’शब्देन विवक्षिताः भवन्ति।

अत्र केचन वेदान्तिनः “तत्त्वमसि” इत्यादि-महावाक्येषु अपि एतादृशीं जहदजहल्लक्षणां स्वीकुर्वन्ति इति प्रतीयते। तथापि अस्माकं मते— “सोऽयं देवदत्तः”, “तत्त्वमसि” इत्यादिषु विशिष्टवाचकपदानाम् एकदेशपरत्वेऽपि न लक्षणा स्वीकार्या। कारणम्— शक्त्या उपस्थितयोः विशिष्टार्थयोः अभेदान्वयस्य यदि अनुपपत्तिः स्यात्, तर्हि लक्षणा स्वीक्रियेत; किन्तु अत्र शक्त्युपस्थितयोः विशेष्ययोः एव अभेदान्वये कश्चन विरोधो नास्ति। यथा— **“घटोऽनित्यः”** इत्यत्र घटपदवाच्यैकदेशस्य घटत्वस्य अनित्यत्वेन सह अन्वयः अयोग्यो भवति, तथापि योग्यायां घटव्यक्तौ अनित्यत्वान्वयः निर्विघ्नं सिद्ध्यति।

---

[36] तत्रैव, पृ. १९९ ।

[37] तत्र शक्यसाक्षात्सम्बन्धः केवललक्षणा। (आगमपरिच्छेदः, लक्षणानिरूपणम्) ।

[38] शक्यपरम्परासम्बन्धेनार्थान्तप्रतीतिस्तत्र लक्षितलक्षणा। (आगमपरिच्छेदः, लक्षणानिरूपणम्) ।

[39] तत्र शक्यमनन्तर्भाव्य यत्रार्थान्तरप्रतीतिस्तत्र जहल्लक्षणा। (आगमपरिच्छेदः, लक्षणानिरूपणम्) ।

[40] यत्र शक्यार्थमन्तर्भाव्यैवार्थान्तरप्रतीतिः तत्राजहल्लक्षणा। (आगमपरिच्छेदः, लक्षणानिरूपणम्) ।

[41] यत्र हि विशिष्टवाचकः शब्द एकदेशं विहाय एकदेशे वर्तते तत्र जहदजहल्लक्षणा । (आगमपरिच्छेदः, लक्षणानिरूपणम्) ।

यत्र तु पदार्थैकदेशस्य केवलं विशेषणतया उपस्थितिः भवति, न तु स्वातन्त्र्येण, तत्रैव तस्य स्वातन्त्र्येण उपस्थित्यर्थं लक्षणा स्वीक्रियते। यथा— **"नित्यो घटः"** इत्यत्र घटपदात् घटत्वस्य शक्त्या स्वातन्त्र्येण अनुपस्थितेः तादृश-उपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा कल्प्यते।

एवमेव "तत्त्वमसि" इत्यादिवाक्येषु अपि लक्षणा न आवश्यकी अस्ति; यतः शक्त्या स्वातन्त्र्येण उपस्थितयोः 'तत्' तथा 'त्वम्' पदयोः विशेष्यभूत-चैतन्यमात्रस्य अभेदान्वये कश्चन बाधको नास्ति। अन्यथा "गेहे घटः", "घटे रूपम्", "घटमानय" इत्यादिषु वाक्येषु अपि घटत्व-गेहत्वादीनां तादृश-अन्वयबोधाय अयोग्यत्वात् घटादिपदानां विशेष्यमात्रपरत्वं लक्षणयैव स्वीक्रियेत, यत् न युक्तम्।

**अतः सिद्धं यत्**— "तत्त्वमसि" इत्यादि-महावाक्येषु आचार्यैः यत्र लक्षणा उक्ता, सा वस्तुतः **अभ्युपगमवादेन** (स्वीकारोक्तिमात्रेण) बोध्या, न तु परमार्थतः। परमार्थतः तु महावाक्यानां तात्पर्यं **विशेषण-विशेष्यभाव-सम्बन्धेन** विशेष्यचैतन्यमात्रपरत्वे एव प्रतिष्ठितम्। एवं चैतेषां वाक्यानां मुख्यं फलम् **अखण्डार्थबोधकत्वम्**, यत् अद्वैतसिद्धिं द्रढयति।[42]

### ९.५. लक्षणाबीजम् (तात्पर्यानुपपत्तिः)

नैयायिकाः 'अन्वयानुपपत्तिम्' लक्षणायाः कारणं मन्यन्ते, किन्तु वेदान्तिनः **'तात्पर्यानुपपत्तिम्'** कारणं मन्यन्ते। यथा— **'काकेभ्यो दधि रक्ष्यताम्'**। अत्र अन्वयस्य कोऽपि बाधः नास्ति, किन्तु तात्पर्यं केवलं 'काकेभ्यः' नास्ति, अपितु 'दधिविघातक-सर्वजन्तुभ्यः' अस्ति। अतः तात्पर्यसिद्धये अत्र लक्षणा स्वीक्रियते।[43]

### ९.६. वाक्यवृत्तिलक्षणा

लक्षणा न केवलं पदमात्रे भवति, अपितु **वाक्ये** अपि सम्भवति। यथा— **'गम्भीरायां नद्यां घोषः'**। अत्र 'गम्भीरायाम्' तथा 'नद्याम्' इति पदद्वयस्य समुदायस्य (वाक्यस्य) 'तीरे' लक्षणा वर्तते।[44]

## १०. अर्थवादवाक्येषु लक्षणाविचारः

अद्वैतवेदान्ते मीमांसासिद्धान्तवत् अर्थवादवाक्यानां स्वातन्त्र्येण प्रामाण्यं नास्ति, अपितु तानि विधिवाक्यैः सह एकवाक्यतया प्रमाणानि भवन्ति। तेषां लक्षणाविषयकं विवेचनं निम्नवत् अस्ति—

### १०.१. प्राशस्त्य-निन्दयोः लक्षणा

अर्थवादवाक्यानि द्विविधानि भवन्ति— प्रशंसारूपाणि निन्दारूपाणि च।

- **प्रशंसार्थवादाः:** यत्र विधेयस्य यागस्य वा वस्तुनः स्तुतिः क्रियते। यथा— **'वायुर्वै क्षेपिष्ठा देवता'**। अत्र वायोः शीघ्रगामित्वं प्रतिपाद्य वायुदेवताक-यागस्य **'प्राशस्त्ये'** (प्रशंसायाम्) लक्षणा भवति।
- **निन्दार्थवादाः:** यत्र निषिद्धकर्मणः त्यागार्थं तस्य निन्दा क्रियते। यथा— **'सोऽरोदीत्'** । अत्र रुदनक्रियायाः निन्दितत्वं प्रतिपाद्य तस्य रजतदाननिषेधे तात्पर्यं भवति।

### १०.२. लक्षणायाः प्रयोजनम्

अर्थवादवाक्यानां केवलं स्वार्थप्रतिपादने किमपि प्रयोजनं न सिद्ध्यति, यतः तेषु विद्यमानाः अर्थाः कदाचित् प्रत्यक्षादिविरुद्धाः अपि भवन्ति। अतः **'विधेयस्य'** प्रशंसायां तथा **'निषेध्यस्य'** निन्दायां च लक्षणया एतेषां चरितार्थता भवति।

---

[42] तत्रैव, पृ. २०९-२१४।

[43] तत्रैव, पृ. २१५।

[44] तत्रैव, पृ. २१६-२१८।

**१०.३. वाक्यलक्षणा (पदैकवाक्यता)**

अत्र एकः सूक्ष्मः विचारः अस्ति— यदि अर्थवादस्य प्रत्येकं पदं लक्षणया प्राशस्त्यं बोधयेत्, तर्हि पदान्तरवैयर्थ्यं स्यात्। अतः ग्रन्थकारः अत्र 'वाक्यलक्षणा' इति सिद्धान्तं स्वीकरोति। सामान्यतः अर्थवादवाक्यानां द्विधा प्रवृत्तिः दृश्यते— प्रशंसारूपाणां तु प्राशस्त्ये लक्षणा, तथा "सोऽरोदीत्" इत्यादीनां निन्दार्थवादवाक्यानां निन्दितत्वे (अथवा अप्राशस्त्ये) लक्षणा। किन्तु यदि अर्थवादगतपदानां पृथक् पृथक् प्राशस्त्यादिलक्षणा स्वीक्रियेत, तर्हि एकेन पदेनैव लक्षणया तदुपस्थितिसम्भवे पदान्तराणां वैयर्थ्यं स्यात्।

अतः एतद्-दोषपरिहारार्थं ग्रन्थकारः एतादृशं मतं प्रतिपादयति—

**"अर्थवादपदसमुदायस्य पदस्थानीयतया विधिवाक्येन सह एकवाक्यत्वम्।"**[45]

अर्थात् सम्पूर्णम् अर्थवादवाक्यं मिलित्वा एकस्य 'पदस्य' इव कार्यं करोति, यथा 'प्रशस्तः' इति पदम्। एवं सति अर्थवादपदसमुदायः विध्यपेक्षितप्राशस्त्यरूपपदार्थस्य प्रत्यायकत्वेन पदस्थानीयत्वं प्राप्नोति। ततः तदर्थवादवाक्यं पदवत् स्थित्वा विधिवाक्येन—यथा "वायव्यं श्वेतमालभेत" इत्यादिना—सह अन्वितं भूत्वा पूर्णबोधं जनयति। एतदेव अर्थवादवाक्यानां **'पदैकवाक्यता'** इति कथ्यते।

अत्र पुनः प्रश्नः भवति— क्व तर्हि वाक्यैकवाक्यता? तत्रोच्यते— यत्र प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपादकयोः वाक्ययोः परस्पराकाङ्क्षया महावाक्यार्थबोधः सिध्यति, तत्र **वाक्यैकवाक्यता** भवति। यथा— "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादीनां वाक्यानां तथा "समिधो यजति" इत्यादीनां वाक्यानां (अङ्गवाक्यानां) च परस्परापेक्षिताङ्गाङ्गिभावबोधकतया एकवाक्यता दृश्यते।

एवमेव भट्टपादैरपि उक्तम्—

**"स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया।**

**वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते॥"**[46]

अर्थात् यानि वाक्यानि स्वार्थबोधे समाप्तानि भवन्ति, तानि यदा अङ्गाङ्गिभावाद्यपेक्षया परस्परं सम्बध्यन्ते, तदा संहत्य महावाक्यार्थबोधं जनयन्ति, ततः तेषां वाक्यानामेकवाक्यता सिद्ध्यति।[47]

**११. वेदानां प्रामाण्यविचारः**

वेदानां प्रामाण्यविषये भारतीयदर्शनेषु वैविध्यं दृश्यते। ग्रन्थकारः अत्र वेदान्तसिद्धान्तं प्रस्थापयन् अन्यमतानां समीक्षां करोति।

**११.१. नैयायिकमतम् — ईश्वरप्रणीतत्वात् प्रामाण्यम्**

नैयायिकानां मते वेदाः पौरुषेयाः सन्ति, यतः ते परमेश्वरप्रणीताः। तेषाम् आशयः अस्ति यत् वेदवाक्यानां प्रामाण्यं तद्वक्तुः (ईश्वरस्य) **'आप्तत्व'**गुणेन सिद्ध्यति। ईश्वरः नित्यः सर्वज्ञश्च अस्ति, अतः तस्मिन् भ्रम-प्रमादादि-दोषाणां सम्भावना नास्ति। अस्मिन् मते 'कर्तृदोषात्' अप्रामाण्यप्रसङ्गः न भवति।

**११.२. मीमांसकमतम् — नित्यत्वात् प्रामाण्यम्**

अध्वरमीमांसकाः (पूर्वमीमांसकाः) वेदानां नित्यत्वं स्वीकुर्वन्ति। तेषां मते वेदः अपौरुषेयः अस्ति (कश्चिदपि पुरुषः अस्य कर्ता नास्ति)। यतः वेदानां 'उत्पत्तिः' एव नास्ति, अतः पुरुषगताः दोषाः (भ्रम-विप्रलिप्सादयः) तत्र प्रवेष्टुं न शक्नुवन्ति। एवं वेदानां **'निरस्तसमस्तपुंदूषणतया'** स्वतः प्रामाण्यं सिद्धम्।

---

[45] तत्रैव, पृ. २१९।
[46] कुमारिलभट्टः, श्लोकवार्त्तिकम्।
[47] तत्रैव, पृ. २२२।

**११.३. वेदान्तिमतम् — उत्पत्तिमत्त्वेऽपि प्रामाण्यम्**

अद्वैतवेदान्ते सिद्धान्तः किञ्चित् भिन्नः अस्ति। वेदान्तिनः वेदानां पारमार्थिकं नित्यत्वं न मन्यन्ते, यतः प्रलयकाले समस्तं जगत् ब्रह्मणि लीनं भवति। अतः वेदाः अपि उत्पत्तिमन्तः सन्ति। अस्मिन् प्रमाणं श्रुतिरेव अस्ति—

**"अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः...।"**[48]

अर्थात् वेदाः ब्रह्मणः निःश्वासभूताः सन्ति। यथा निःश्वासः विना बुद्धिसन्धानं (विवक्षां) स्वाभाविकतया जायते, तथैव वेदाः अपि ब्रह्मणः सकाशात् अनायासेन आविर्भवन्ति।[49]

**११.४. प्रत्यभिज्ञाविरोधात् क्षणिकत्वाभावः**

यद्यपि वेदाः उत्पत्तिमन्तः, तथापि ते क्षणिकाः न सन्ति। अस्मिन् **'प्रत्यभिज्ञा'** प्रमाणम् अस्ति। यथा— **'य एव वेदो देवदत्तेनाधीतः स एव वेदो मयाऽधीतः'**। यदि वेदाः क्षणिकाः अभविष्यन्, तर्हि तादृशी प्रतीतिः न अभविष्यत्। तथैव वर्णानां (गकारादीनां) विषयेऽपि **'सोऽयं गकारः'** इति प्रत्यभिज्ञया तेषां स्थिरता सिद्ध्यति।[50]

**११.५. वर्णानां नित्यत्वम्**

ग्रन्थकारः मते वर्णाः विभुवत् व्यापकाः सन्ति। 'गकारः उत्पन्नः' इति प्रतीतिः तु केवलं कण्ठ-ताल्वादि-व्यञ्जकैः तेषां **'अभिव्यक्ति'**मात्रं वर्तते।

**"अनुच्चारणदशायां वर्णानामभिव्यक्तिः तदुच्चारणरूपव्यञ्जकाभावान्न विरुध्यते, अन्धकारस्थले घटानुपलम्भवत्।"**[51]

अर्थात् यथा अन्धकारे घटः विद्यमानोऽपि न दृश्यते (प्रकाशाभावात्), तथैव अनुच्चारणकालेऽपि वर्णाः सन्ति, किन्तु उच्चारणाभावात् न श्रूयन्ते। एवं वर्णानां स्थायित्वेन वेदानां प्रामाण्यं सुरक्षितं तिष्ठति।

**१२. पौरुषेयापौरुषेयविचारः**

वेदानां स्वरूपं निरूपयन् ग्रन्थकारः पौरुषेयत्व-अपौरुषेयत्वविषये नूतनां वैज्ञानिकीं च परिभाषां प्रस्तौति।

**१२.१. पौरुषेयत्वलक्षणस्य परिष्कारः**

नैयायिकाः मन्यन्ते यत् पुरुषेण (ईश्वरेण) निर्मितत्वात् वेदाः पौरुषेयाः। ग्रन्थकारः अस्य खण्डनं कुर्वन् पौरुषेयत्वस्य लक्षणं परिष्करोति—

- **न तावत् पुरुषेणोच्चार्यमाणत्वम्:** यदि केवलं पुरुषेण उच्चारणं 'पौरुषेयत्वं' स्यात्, तर्हि मीमांसकानामपि (गुरुमतम्) मते वेदाः पौरुषेयाः भवेयुः, यतः तत्रापि गुरु-शिष्यपरम्परया उच्चारणं भवति।
- **नापि पुरुषाधीनोत्पत्तिकत्वम्:** यदि पुरुषेण उत्पत्तिः पौरुषेयत्वं स्यात्, तर्हि अस्मदादिभिः (वेदान्तिभिः) सह 'सिद्धसाधनत्वं' स्यात्, यतः वयमपि वेदानां सर्गादौ उत्पत्तिं स्वीकुर्मः।

अतः ग्रन्थकारः वास्तविकं लक्षणं ददाति—

**"किन्तु सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वम्।"**[52]

[48] बृहदारण्यकोपनिषत् २.४.१०।
[49] तत्रैव, पृ. २३९।
[50] तत्रैव, पृ. २४१।
[51] तत्रैव, पृ. २४१।
[52] तत्रैव, पृ. २४३।

अर्थात् यस्य उच्चारणं पूर्वतन-सजातीय-उच्चारणस्य अपेक्षां न करोति (स्वतन्त्रं भवति), तत् **'पौरुषेयम्'**। यथा— कालिदासादीनां काव्यानि। कालिदासेन रघुवंशं स्वप्रतिभया नूतनतया रचितं, न तु कस्यचित् पूर्वतन-रघुवंशस्य अनुकरणं कृतम्।

**१२.२. वेदानामपौरुषेयत्वसिद्धिः**

वेदाः अपौरुषेयाः सन्ति, यतः ते **'सजातीयोच्चारणसापेक्षाः'** सन्ति।

**"सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदानुपूर्वीसमानानुपूर्वीकं वेदं विरचितवान्, न तु विजातीयम्।"**[53]

**विवेचनम्:** सृष्टेः आरम्भे परमेश्वरः वेदान् रचयति, किन्तु सः स्वेच्छया नूतनानुपूर्वीम् (Words order) न निर्मान्ति। सः पूर्वकल्पे यथा वेदाः आसन्, तथैव इदानीमपि तान् आविष्करोति। यथा— 'अध्यापकः' पूर्वम् अधीतं पाठं पुनः उच्चारयति, तत्र अध्यापकः कर्ता भवति अपि तु सः पाठः 'पौरुषेयः' न उच्यते। अतः सजातीय-उच्चारण-सापेक्षत्वात् वेदाः **'अपौरुषेयाः'**। महाभारत-स्मृत्यादीनां रचना तु सजातीय-अनुपूर्वीम् अनपेक्ष्य भवति, अतः तानि पौरुषेयाणि। स्मृतीनां प्रामाण्यं तु श्रुतिमूलकत्वात्। यत्र स्मृतिः श्रुत्या विरुध्यते, तत्र 'विरोधे गुणवादः' इति न्यायेन श्रुतिरेव बलवती।

**१२.३. विविधमतसमन्वयः**

ग्रन्थकारः अत्र न्याय-मीमांसा-वेदान्तानां समन्वयम् एवं करोति—

१. **उत्पत्तिमत्त्वम्:** वेदानाम् उत्पत्तिः भवति (न्याय-वेदान्त सम्मतम्)।

२. **अपौरुषेयत्वम्:** वेदाः अपौरुषेयाः, यतः ईश्वरः पूर्वसिद्ध-अनुपूर्वीम् एव अनुसरति (वेदान्त-वैशिष्ट्यम्)।

३. **प्रामाण्यम्:** एतेन वेदानां स्वतःप्रामाण्यं नित्यत्वं च (प्रवाह-नित्यतया) सिद्ध्यति।

न्याय-वेदान्तमतयोः शब्दप्रमाणविषयकः तुलनात्मकः विवेकः अधोलिखितया सारण्या स्पष्टीभवति—

| **विषयः** | **न्यायमतम्** | **वेदान्तमतम्** |
|---|---|---|
| **शक्तिः** | ईश्वरेच्छा (ईश्वरस्य इच्छा) | पदार्थान्तरम् (स्वतन्त्रपदार्थः) |
| **वेदाः** | पौरुषेयाः (ईश्वरनिर्मिताः) | अपौरुषेयाः (सजातीयोच्चारणसापेक्षत्वात्) |
| **लक्षणाबीजम्** | अन्वयानुपपत्तिः | तात्पर्यानुपपत्तिः |

**१२.४ आधुनिक-प्रासंगिकता**

धर्मराजाध्वरीन्द्रस्य शाब्दबोधप्रक्रिया न केवलं प्राचीना, अपितु आधुनिक-भाषाविज्ञानस्य (Modern Linguistics) दृष्ट्यापि अत्यन्तं प्रासंगिकी वर्तते। आधुनिक-सिमेंटिक्स (Semantics) शास्त्रे 'Context' (प्रकरण) इत्यस्य यत् महत्त्वं वर्तते, तदेव ग्रन्थकारेण 'तात्पर्यज्ञान'रूपेण बहुपूर्वमेव प्रतिपादितम्। 'पदजन्यपदार्थोपस्थितिः' इति सिद्धान्तः आधुनिक-संज्ञात्मक-मनोविज्ञानेन (Cognitive Science) सह संवादं स्थापयति।

**१३. उपसंहारः**

**'वेदान्तपरिभाषा'** इत्यस्य आगमपरिच्छेदस्य अनुशीलनेनेदं स्पष्टं भवति यत् **धर्मराजाध्वरीन्द्रः** अद्वैतवेदान्तस्य प्रमाणमीमांसां तार्किकनिकषे सुदृढां करोति। अस्य अध्ययनस्य मुख्याः निष्कर्षाः निम्नवत् सन्ति—

1. **प्रमाणलक्षणम्:** आगमप्रमाणस्य लक्षणे 'तात्पर्य'पदस्य निवेशः अर्थवादवाक्यानां महावाक्यानां च प्रामाण्यं सुरक्षितं करोति। **'तात्पर्यविषयीभूतसंसर्गाबाधः'** इति लक्षणेन अबाधितविषयत्वं शब्दप्रमाणस्य मुख्यं बीजं सिद्धम्।

---

[53] तत्रैव, पृ. २४५।

2. **शाब्दबोधकारणानि:** वाक्यजन्यज्ञाने आकाङ्क्षा-योग्यता-आसत्ति-तात्पर्यज्ञानानां चतुर्णां कारणानां वैज्ञानिकं विवेचनं कृतम्। विशेषतः आकाङ्क्षायाः **'अर्थनिष्ठत्वं'** तथा च योग्यतायाः **'तात्पर्यमूलकत्वं'** वेदान्तप्रक्रियायाः वैशिष्ट्यं प्रकटयति।

3. **शक्ति-लक्षणा-विचारः:** शक्तेः **'पदार्थान्तरत्वं'** स्वीकृत्य ग्रन्थकारेण शब्दार्थसम्बन्धस्य स्वाभाविकता प्रतिपादिता। लक्षणायाः बीजं 'अन्वयानुपपत्तिः' न भूत्वा **'तात्पर्यानुपपत्तिः'** अस्ति, इति मतेन वेदान्तस्य व्यापकता सिद्ध्यति।

4. **महावाक्यसमन्वयः:** 'तत्त्वमसि' इत्यादिषु महावाक्येषु **'जहदजहल्लक्षणा'** अथवा लक्षणां विनापि विशेष्यांशे अभेदान्वयस्य या प्रक्रिया दर्शिता, सा जीव-ब्रह्मणोः ऐक्यसाधने मुख्या वर्तते।

5. **वेदानामपौरुषेयत्वम्:** वेदानाम् उत्पत्तिमत्त्वेऽपि तेषां **'सजातीयोच्चारणसापेक्षत्वम्'** इति युक्तिः अतीव प्रबला अस्ति। एतेन वेदानां प्रामाण्यं, नित्यत्वं तथा च ईश्वरीयज्ञानत्वं युगपत् सिद्धं भवति।

**निष्कर्षः:** अस्मिन् परिच्छेदे ग्रन्थकारः नैयायिक-मीमांसक-वैशेषिकादि-प्रतिपक्षमतानां सूक्ष्मं परीक्षणं कृत्वा अद्वैतवेदान्तस्य **'शब्दप्रमाण'**सिद्धान्तं प्रतिष्ठापयति। एतदध्ययनं न केवलं शाब्दबोधस्य प्रक्रियां स्पष्टयति, अपितु वेदान्तप्रतिपाद्य-अद्वैततत्त्वस्य अधिगतौ शब्दप्रमाणस्य अनिवार्यतां द्रढयति।

**निष्कर्षतः वक्तुं शक्यते यत्— वेदान्तपरिभाषा केवलं प्रक्रियाग्रन्थो नास्ति, अपितु एषा शाब्दबोधप्रक्रियया ब्रह्मसाक्षात्कारस्य मार्गं प्रशस्तं करोति।** अतः वेदान्तपरिभाषाकारस्य आगमविचारः न केवलं शुष्कस्तर्कः, अपितु जिज्ञासोः अपरोक्षानुभूतिसाधकं प्रबलं साधनं वर्तते। **'मानधीना मेयसिद्धिः'** इति न्यायेन अद्वैतब्रह्मसिद्धिः आगमप्रमाणेनैव सुस्थिरा तिष्ठति।

### सन्दर्भ-ग्रन्थसूची


- **अन्नम्भट्टः।** (१९८५)। *तर्कसंग्रहः*। दिल्ली: चौखम्बासंस्कृतप्रतिष्ठानम्।
- **ईश्वरकृष्णः।** (२०१७)। *सांख्यकारिका* (गौडपादभाष्यसहिताः; संस्कृतपाठः हिन्दीअनुवादसहितः)। दिल्ली: मोतीलालबनारसीदासः।
- **ईशादि नौ उपनिषद्।** (२०२२)। *(शाङ्करभाष्य-हिन्द्यनुवादसहिता)*। गोरखपुर: गीताप्रेस्।
- **कुमारिलभट्टः।** (२००२)। *मीमांसाश्लोकवार्तिकम्* (श्यामसुन्दरशर्मकृतहिन्दीव्याख्यासहितम्)। वाराणसी: भारतीयविद्यासंस्थानम्।
- **छान्दोग्योपनिषत्।** (२०११)। *(शाङ्करभाष्य-हिन्द्यनुवादसहिता)*। गोरखपुर: गीताप्रेस्।
- **जैमिनिः।** (२०१८)। *मीमांसासूत्रम्* (श्रीरामशर्मभगवतीदेवीशर्मकृतहिन्दीव्याख्यासहितम्)। हरिद्वार: श्रीवेदमातागायत्रीन्यासः।
- **धर्मराजाध्वरीन्द्रः।** (१९२७)। *वेदान्तपरिभाषा* (म.म. अनन्तकृष्णशास्त्रिविरचिता प्रकाशिका टीकासहितम्)। कलकत्ता: कलकत्ताविश्वविद्यालयः।
- **धर्मराजाध्वरीन्द्रः।** (१९६८)। *वेदान्तपरिभाषा* (श्रीगजाननशास्त्री मुसलगांवकरकृत'प्रकाश'हिन्दीव्याख्योपेता)। वाराणसी: चौखम्बाविद्याभवनम्।
- **नागेशभट्टः।** (२०१९)। *परमलघुमञ्जूषा* (वंशीधरमिश्रकृतहिन्दीअनुवादसहितम्)। वाराणसी: चौखम्बाविद्याभवनम्।
- **भर्तृहरिः।** (१९३४)। *वाक्यपदीयम्* (सम्पा. काशीनाथशास्त्री आप्टे)। पुणे: आनन्दाश्रममुद्रणालयः।
- **ब्रह्मानन्दगिरिः।** (१९८७)। *शाक्तानन्दतरङ्गिणी* (राजनाथत्रिपाठीसम्पादिता)। वाराणसी: सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।
- **बृहदारण्यकोपनिषत्।** (२०१४)। *(शाङ्करभाष्य-हिन्द्यनुवादसहिता)*। गोरखपुर: गीताप्रेस्।
- **शर्मा, चन्द्रधरः।** (१९६०)। *A Critical Survey of Indian Philosophy*। दिल्ली: मोतीलालबनारसीदासः।
- **श्रीमद्भगवद्गीता।** (२०१५)। *(शाङ्करभाष्य-हिन्द्यनुवादसहिता)*। गोरखपुर: गीताप्रेस्।